# Brahmakritam 07 Vishnu Stotram

# બ્રહ્મકૃતં ૭ વિષ્ણુસ્તોત્રમ્

## Document Information

Text title : Brahmakritam 07 Vishnu Stotram

File name : brahmakRRitaM07viShNustotram.itx

Category : vishhnu, vishnu, bhAgavatapurANa, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : bhAgavatapurANa | adhyAya 2/6/35-44||

Latest update : September 6, 2025

Send corrections to : sanskrit at cheerful dot c om


This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**


Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 6, 2025

*sanskritdocuments.org*

# બ્રહ્મકૃતં ૭ વિષ્ણુસ્તોત્રમ્

નતોઽસ્મ્યહં તચ્ચરણં સમીયુષાં
ભવચ્છિદં સ્વસ્ત્યયનં સુમઙ્ગલમ્ ।
યો હ્યાત્મમાયાવિભવં સ્મ પર્યગાત્
યથા નભઃ સ્વાન્તમથાપરે કુતઃ ॥ ૩૫॥

નાહં ન યૂયં યદૃતાં ગતિં વિદુ-
ર્ન વામદેવઃ કિમુતાપરે સુરાઃ ।
તન્માયયા મોહિતબુદ્ધયસ્ત્વિદં
વિનિર્મિતં ચાત્મસમં વિચક્ષ્મહે ॥ ૩૬॥

યસ્યાવતારકર્માણિ ગાયન્તિ હ્યસ્મદાદયઃ ।
ન યં વિદન્તિ તત્ત્વેન તસ્મૈ ભગવતે નમઃ ॥ ૩૭॥

સ એષ આદ્યઃ પુરુષઃ કલ્પે કલ્પે સૃજત્યજઃ ।
આત્માઽઽત્મન્યાત્મનાઽઽત્માનં સંયચ્છતિ ચ પાતિ ચ ॥ ૩૮॥

વિશુદ્ધં કેવલં જ્ઞાનં પ્રત્યક્ સમ્યગવસ્થિતમ્ ।
સત્યં પૂર્ણમનાદ્યન્તં નિર્ગુણં નિત્યમદ્વયમ્ ॥ ૩૯॥

ઋષે વિદન્તિ મુનયઃ પ્રશાન્તાત્મેન્દ્રિયાશયાઃ ।
યદા તદેવાસત્તર્કૈસ્તિરોધીયેત વિપ્લુતમ્ ॥ ૪૦॥

આદ્યોઽવતારઃ પુરુષઃ પરસ્ય
કાલઃ સ્વભાવઃ સદસન્મનશ્ચ ।
દ્રવ્યં વિકારો ગુણ ઇન્દ્રિયાણિ
વિરાટ્ સ્વરાટ્ સ્થાસ્નુ ચરિષ્ણુ ભૂમ્નઃ ॥ ૪૧॥

અહં ભવો યજ્ઞ ઇમે પ્રજેશા
દક્ષાદયો યે ભવદાદયશ્ચ ।
સ્વર્લોકપાલાઃ ખગલોકપાલા

નૃલોકપાલાસ્તલલોકપાલાઃ ॥ ૪૨॥

ગન્ધર્વવિદ્યાધરચારણેશા
યે યક્ષરક્ષોરગનાગનાથાઃ ।
યે વા ઋષીણામૃષભાઃ પિતૄણાં
દૈત્યેન્દ્રસિદ્ધેશ્વરદાનવેન્દ્રાઃ ।
અન્યે ચ યે પ્રેતપિશાચભૂત-
કૂષ્માણ્ડયાદોમૃગપક્ષ્યધીશાઃ ॥ ૪૩॥

યત્કિઞ્ચ લોકે ભગવન્ મહસ્વ-
દોજઃસહસ્વદ્બલવત્ક્ષમાવત્ ।
શ્રીહ્રીવિભૂત્યાત્મવદદ્ભુતાર્ણં
તત્ત્વં પરં રૂપવદસ્વરૂપમ્ ॥ ૪૪॥

ઇતિ શ્રીમદ્ભાગવતમહાપુરાણે દ્વિતીયસ્કન્ધે ષષ્ઠાધ્યાયાન્તર્ગતં
બ્રહ્મકકૃતં વિષ્ણુસ્તોત્રં સમાપ્તમ્ ।

ભાગવતપુરાણ । અધ્યાય ૨/૬/૩૫-૪૪॥

bhAgavatapurANa . adhyAya 2/6/35-44..

Proofread by PSA Easwaran

*Brahmakritam 07 Vishnu Stotram*
pdf was typeset on September 6, 2025

Please send corrections to *sanskrit@cheerful.com*